

## १. चित्रपटवर्णनम्।

अद्यतनीये आधुनिके युगे 'चित्रपट:' जनानां मनोरञ्जनस्य उत्तमं साधनं मन्यते । 'नाट्यशास्त्रम्' इति स्वग्रन्थे भरतमुनिना वर्णिता: रसा: भावा: च अधुना चित्रपटमाध्यमेन अपि अस्मान् आनन्दयन्ति । शृङ्गार:, हास्य:, रौद्र:, करुण:, वीर:, अद्भुत:, बीभत्स:, भयानक:, शान्त: च इति नव रसान् आधृत्य नैके चित्रपटप्रकारा: नैकासु भाषासु निर्मिता: भवन्ति । तेषु केचित् अस्माभि: वर्णनीया: ।

**मार्गदर्शक: शब्दकोष: ।**


चित्रग्राही (Camera इति आङ्ग्लभाषायाम्)/नट:/अभिनेता, नायक:/नायिका, नटी/अभिनेत्री, खलनायक:/खलनायिका, लेखक: , संवादा: , गीतानि, मनोरञ्जनम्, कथा, प्रारम्भ:, अन्त:, पराकोटि: (स्त्री)/उत्कर्षबिन्दु: (Climax इति आङ्ग्लभाषायाम्)/पार्श्वसङ्गीतम् ।







## रहस्यपटः ।

प्रियरहस्यपटस्य नाम 'कहानी' इति । एतस्मिन् चित्रपटे विद्या-बालनमहोदया प्रमुखा नायिका वर्तते । नायिकाप्रधानः एव एषः चित्रपटः । गर्भवती नायिका स्वपतेः अन्वेषणार्थं कोलकतानगरम् आगच्छति । सा नैकेषां सङ्कटानां प्रतिकारं करोति । प्रेक्षकाणां मनसि तस्याः कृते करुणा जायते । किन्तु अन्ते रहस्यभेदः भवति यत् सा तु नैव गर्भवती । सा जानाति यत् तस्याः पतिः मृतः । तस्य घातकस्य अन्वेषणार्थम् एव सा छद्मवेषं धृत्वा अटति । सा दुर्गापूजासमये मार्गे स्वपतेः घातकस्य वधं करोति । प्रायः सर्वेभ्यः/सर्वाभ्यः एतस्मिन् चित्रपटे विद्यामहोदयायाः अभिनयः अतीव रोचते ।




## भयपटः ।

गतसप्ताहे एकः भयपटः दृष्टः । तस्य नाम 'स्त्री' इति । एतस्मिन् चित्रपटे श्रद्धा कपूरमहोदया प्रमुखा नायिका। राजकुमार रावमहोदयः प्रमुखः अभिनेता च । एकस्मिन् ग्रामे 'स्त्री' इति एका निशाटा पूजासमये रात्रौ आगत्य पुरुषाणाम् अपहरणं करोति । एतस्मिन् समये पार्श्वे भयकारिध्वनिः जायते । तस्याः निवारणार्थं जनाः द्वारे 'ओ स्त्री कल आना' इति वाक्यं लिखन्ति । अन्ते या चित्रपटस्य नायिका सा एव खलनायिका नाम 'स्त्री' इति दिग्दर्शकः सूचयति । चित्रपटस्य संवादाः अधिकं गूढं निर्मान्ति । गीतानि अपि रम्याणि गेयानि च सन्ति । प्रायः सर्वेभ्यः/सर्वाभ्यः एषः चित्रपटः रोचते यतः तस्य अन्तपर्यन्तं गूढः अनाकलनीयः वर्तते ।





**✻ मञ्जूषातः उचितान् शब्दान् चित्वा चित्रपटवर्णनस्य रिक्तस्थानानि पूरयत ।**

**देशभक्तिपटः ।**

'उरी-द सर्जिकल स्ट्राईक' इति ............. दृष्टः । विकी-कौशलमहोदयः एतस्मिन् चित्रपटे ............. भूमिकां नाटयति । यामी-गौतममहोदया नायिका च । एषः चित्रपटः ............. । प्रारम्भे भारतीयसेनायाः 'पठाणकोटः' इति सेनानिवेशे ............. आक्रमणं भवति । तस्मिन् नैके भारतीयसैनिकाः ............. प्राप्नुवन्ति। तस्य आक्रमणस्य प्रतिक्रियारूपेण भारतीयसैनिकाः एकां योजनां रचयन्ति । योजनायाः अनुसारं ............. भारतीयचमूः शत्रुनिवेशं प्रविश्य तेषां शिबिरम् उद्ध्वस्तं करोति । अस्माकं भारतस्य कोऽपि .............क्षतिग्रस्तः न भवति । अन्ते अस्माकं भारतस्य एव जयः भवति । एषः चित्रपटः सामान्यजनानां मनसि ............. कृते आदरं जनयति । सर्वेभ्यः/सर्वाभ्यः ............. प्रेरणां यच्छति च ।

(सत्यघटनाधारितः, सेनानायकस्य, देशभक्तिपटः, शत्रुसैनिकानाम्, योद्धा, वीरगतिं, प्रतिक्रियारूपेण, देशभक्तैः, मध्यरात्रौ, सेनायाः)

## २. वृत्तान्तलेखनम्




कार्यक्रमपत्रिका (वृक्षारोपणकार्यक्रमः)

**निमन्त्रणम्**

**वृक्षो रक्षति रक्षितः ।**

**विश्वपर्यावरणदिननिमित्तेन**

**वनविभागः, महाराष्ट्रशासनम् तथा च निसर्गमित्रमण्डलं, जलग्रामः आयोजयति ।**

**आयुर्वेदिकवृक्षारोपणकार्यक्रमः ।**

**मुख्यातिथिः –** डॉ. महेशः प्रभाकरन् । (मा. वनायुक्तः) **उद्घाटकः –** प्रा. एन. रामचन्द्रः (उद्यानविद्यावेत्ता)

**स्थलम् –** बोराखेडी ग्रामं, जलग्रामः जनपदः । **समयः –** प्रातः १०.०० वादने । दि. ५.६.२०१९

सर्वेषां सहर्षं स्वागतम् ।

**संयोजकाः**

| | | |
|---|---|---|
| **सौ. तृप्ती सागर** | **श्री. जाधव विजय** | **श्री. राजहंस** |
| ९३×××××××७५ | ९४×××××××१० | ९४×××××××२७ |

**मार्गदर्शक–प्रश्नाः ।**

१) कः कार्यक्रमः ? २) किं निमित्तम् ? ३) कदा/कस्मिन् दिनाङ्के ?
४) कुत्र सम्पन्नः ? ५) प्रमुखातिथिः कः ? ६) कः आयोजकः ?
७) कार्यक्रमस्य समयः कः ? ८) संयोजकाः के ? ९) ध्येयवाक्यं किम् ?
१०) कार्यक्रमः केषां कृते ?

वृत्तान्तलेखनम् ।

वृक्षो रक्षति रक्षितः ।

विश्वपर्यावरणदिननिमित्तेन 'महाराष्ट्रशासनस्य वनविभागः' तथा 'निसर्गमित्रमण्डलं, जलग्रामः एताभ्यां सम्मिल्य 'बोराखेडीग्रामे 'आयुर्वेदिकवृक्षारोपणकार्यक्रमः' आयोजितः । जूनमासस्य पञ्चमे दिनाङ्के प्रातः दशवादने एषः कार्यक्रमः सम्पन्नः । मा. वनायुक्तः 'मा. डॉ. महेशः प्रभाकरन्' महोदयः मुख्यातिथिरूपेण तत्र उपस्थितः। उद्यानविद्यावेत्ता 'मा. प्रा. एन्. रामचन्द्रः' अस्य कार्यक्रमस्य उद्घाटनं कृतवान् ।

वृक्षारोपणं तु सर्वदा सर्वत्र एव भवति । परम् अयं विशिष्टः कार्यक्रमः यतोऽहि अत्र दुर्लभाणाम् आयुर्वेदिकवृक्षाणां रोपणं कृतं जनैः ।

सौ. तृप्ती सागरमहोदया, श्री. जाधव विजयमहोदयः तथा श्री. राजहंसमहोदयः एभिः एषः कार्यक्रमः सफलतां नीतः ।

पञ्चममण्डलम् ।

## सङ्कलितभाषाभ्यासः -५

- निमन्त्रणपत्रिकां दृष्ट्वा मार्गदर्शकप्रश्नाधारेण कार्यक्रमस्य वृत्तान्तं लिखत ।

### निमन्त्रणम्

'निर्मलं च विशुद्धं च मानसं देवमन्दिरम् ।

स्वच्छता-अभियानं, महाराष्ट्रशासनं तथा च

महात्मागान्धि-महाविद्यालयः, सेवाग्रामः आयोजयति ।

एकदिवसीयं-ग्रामस्वच्छताअभियानम् ।

मुख्यातिथिः - श्रीमती वनमाला सी. जी. (ग्रामविकास-सचिवः)

उद्घाटकः - डॉ. नरसिंहः परदेसी (प्रख्यात-समाजसेवकः)

स्थलम् - पवनारग्रामः, वर्धाजनपदः ।

समयः - प्रातः ८ वादनतः सायं ६ वादनपर्यन्तम् ।

सर्वेषां सहर्ष स्वागतम् ।

✻ संयोजकाः ✻

| | | |
|---|---|---|
| सौ. जया शुद्धे | श्रीमती शुभ्रा गोरे | श्री. पावन तीर्थस्थळे |
| ९४××××××६० | ९१××××××४२ | ७७××××××२१ |

**मार्गदर्शक-प्रश्नाः ।**

१) कः कार्यक्रमः ?
२) किं निमित्तम् ?
३) कदा/कस्मिन् दिनाङ्के ?
४) कुत्र सम्पन्नः ?
५) प्रमुखातिथिः कः ?
६) कः आयोजकः ?
७) कार्यक्रमस्य समयः कः ?
८) संयोजकाः के ?
९) ध्येयवाक्यं किम् ।
१०) कार्यक्रमः केषां कृते ?